# केन्द्रीय विद्यालय सीतापुर
## सी सी टी संस्कृत
## कक्षा 6

निम्नलिखित गद्यांशों को ध्यानपूर्वक पढ़कर प्रश्नों के उत्तर लिखिए:-

1) भारतस्य उत्तरस्यां दिशि हिमालयः पर्वतः अस्ति। सः भारतस्य मुकुटमणिः इव शोभते। सः शत्रुभ्यः अस्मान् रक्षति। अस्य दक्षिणपूर्व-दिशयोः समुद्रौ स्तः। सागरः भारतमातुः चरणौ प्रक्षालयति इव। अस्माकं देशे अनेके पर्वताः सन्ति। अत्र अनेकाः नद्यः प्रवहन्ति। नद्यः पानाय जलं यच्छन्ति। ताः नद्यः देशे शस्यम् अपि सिञ्चन्ति। एवं ताः अस्माकम् उदरपूरणीय अन्नं जलं च यच्छन्ति।

2) प्रश्न 1.उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत?

1) भारतः ग) पर्वतः

2) हिमालयः घ) नद्यः

प्रश्न 2.हिमालयः केभ्यः अस्मान् रक्षति?

1) शत्रुभ्यः ग) नदीभ्यः

2) मित्रेभ्यः घ) पर्वतेभ्यः

प्रश्न 3.देशे शस्य काः सिञ्चन्ति?

1) पर्वताः ग) नद्य

2) समुद्राः घ) हिमालयः

प्रश्न 4.हिमालयः भारतस्य कस्यां दिशि वर्तते?

1) पूर्व दिशि ग) उत्तरस्यां दिशि

2) पश्चिम दिशि घ) दक्षिण दिशि

5.भारतस्य मुकुटमणिः इव कः शोभते?

क) हिमालयः ग) नदी

ख) सागरः घ) स्वर्णः

(2) विवेकानन्दस्य जन्म कोलकाता (कलकत्ता) महानगरे अभवत्। बाल्यकाले अस्य नाम नरेन्द्र' इति आसीत्। नरेन्दस्य पितुः नाम विश्वनाथदत्तः मातुः नाम च भुवनेश्वरी आसीत्। सः रामकृष्ण परमहंसस्य शिष्यः आसीत्। विवेक प्राप्य एषः। एव नरेन्द्रः विवेकानन्दस्य नाम्ना प्रसिद्धः अभवत्। सः समाज सुधारकः, भारतीयसंस्कृतेः रक्षकः जनप्रेरकः च आसीत्।

प्रश्न 1.उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत?

1) बालक नरेंद्र ग) रक्षकः

2) जनप्रेरकः घ) भारतीय संस्कृति

प्रश्न 2.विवेकानन्दस्य जन्म कस्मिन् महानगरे अभवत्?

1) हैदराबाद ग) मुम्बई

2) देहली घ) कोलकाता

प्रश्न 3.बाल्यकाले विवेकानन्दस्य किं नाम आसीत्?

1) नरेन्द्र ग) नरेश

2) शिवेन्द्र घ) महेंद्र

प्रश्न 4.रामकृष्ण परमहंसस्य शिष्यः कः आसीत्।

1) शिवेन्द्र ग) नरेश

ख)नरेन्द्र घ) महेंद्र

प्रश्न 5.नरेन्दस्य पितुः नाम किम् आसीत्?

क) रामकृष्ण ग) विवेकानन्द

ख) परमहंस घ) विश्वनाथदत्त

(3) नगरस्य पूर्वभागे एकम् उद्यानम् अस्ति। उद्याने विविधाः वृक्षाः, पादपाः, लताः च सन्ति। वृक्षाः मधुराणि फलानि यच्छन्ति। इमे आम्रवृक्षाः सन्ति। आम्रवृक्षे पिकः तिष्ठति। पिकः मधुरं गायति। पादपेषु लतासु च पुष्पाणि विकसन्ति। पुष्पेषु सुगन्धिः भवति। अतः पुष्पेषु भ्रमराः तिष्ठन्ति, पुष्पाणां रसं पिबन्ति, मधुरेण स्वरेण च गुञ्जन्ति।

प्रश्न 1.उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत?

1) उद्यानम्
2) पुष्पम्
3) वृक्षाः
4) लताः

प्रश्न 2.नगरस्यपूर्व भागे किम् अस्ति?

क)उद्यानम् ग) वृक्षाः

ख)पुष्पम् घ)लताः

प्रश्न 3.सुगन्धिः केषु भवति?

1) वृक्षेषु
2) पुष्पेषु
3) लतासु
4) पादपेषु

प्रश्न 4.पिकः कुत्र तिष्ठति?

1) लतासु
2) पुष्पेषु
3) आम्रवृक्षे
4) पादपेषु

प्रश्न 5.पुष्पेषु के तिष्ठन्ति?

1) भ्रमराः
2) पक्षिणः
3) पिकाः
4) शुकाः